श्रीमद् ભાગવત નો આ સાર
ભગવદ્ ભક્તિ જ આધાર

॥ શ્રી હરિઃ ॥

નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્ ।
દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્ ॥
નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્ ।
પ્રણામો દુઃખશમનઃ(સ્), તં(ન્) નમામિ હરિં(મ્) પરમ્ ॥

શ્રીમદ્ભાગવતમહાપુરાણમ્ દશમઃસ્કંધઃ
અથૈકત્રિંશોઽધ્યાયઃ(ગોપિકા ગીત)



प्रेम का रस बिछोह की पाती
गोपी गीत अमृत की भांति।।

ગોપ્ય ઊચુઃ

જયતિ તેઽધિકં(ઞ્) જન્મના વ્રજઃ(શ્),
શ્રયત ઈન્દિરા શશ્વદત્ર હિ ।
દયિત દૃશ્યતાં(ન્) દિક્ષુ તાવકાસ્ -
ત્વયિ ધૃતાસવસ્ત્વાં(મ્) વિચિન્વતે ॥૧॥

ધૃતા + સવસ્ + ત્વાં(મ્)

શરદુદાશયે સાધુજાતસત્
સરસિજોદરશ્રીમુષા દૃશા ।
સુરતનાથ તેઽશુલ્કદાસિકા,
વરદ્ નિઘ્નતો નેહ કિં(મ્) વધઃ ॥૨॥

સરસિ + જોદર + શ્રીમુષા

વિષજલાપ્યયાદ્ વ્યાલરાક્ષસાદ્
વર્ષમારુતાદ્ વૈદ્યુતાનલાત્ ।
વૃષમયાત્મજાદ્ વિશ્વતોભયા -
દૃષભ તે વયં(મ્) રક્ષિતા મુહુઃ ॥૩॥

વિષ + જલાપ્યયાદ્, વ્યાલ + રાક્ષસાદ્
વર્ષ + મારુતાદ્, વૈદ્યુતા + નલાત્
વૃષ + મયાત્મજાદ્

શ્રીમદ્ ભાગવત નો આ સાર
ભગવદ્ ભક્તિ જ આધાર

ન ખલુ ગોપિકાનન્દનો ભવા -
નખિલદેહિનામન્તરાત્મદૃક્ ।
વિખનસાર્થિતો વિશ્વગુપ્તયે
સખ ઉદેયિવાન્ સાત્વતાં(ઙ્) કુલે ॥૪॥

નખિલ + દેહિના + મન્ત + રાત્મદૃક્
વિખન + સાર્થિતો

વિરચિતાભયં(મ્) વૃષ્ણિધુર્ય તે
ચરણમીયુષાં(મ્) સં(વ્)સૃતેર્ભયાત્ ।
કરસરોરુહં(ઙ્) કાન્ત કામદં(મ્)
શિરસિ ધેહિ નઃ(શ્) શ્રીકરગ્રહમ્ ॥૫॥

વિરચિતા + ભયં
સં(વ્)સૃતેર + ભયાત્

વ્રજજનાર્તિહન્ વીર યોષિતાં(ન્)
નિજજનસ્મયધ્વં(વ્)સનસ્મિત ।
ભજ સખે ભવત્કિં(ઙ)કરીઃ(સ્) સ્મ નો
જલરુહાનનં(ઞ્) ચારુ દર્શય ॥૬॥

વ્રજ + જનાર્ + તિહન્
નિજ + જનસ્મય + ધ્વં(વ્)સનસ્મિત

પ્રણતદેહિનાં(મ્) પાપકર્શનં(ન્)
તૃણચરાનુગં(મ્) શ્રીનિકેતનમ્ ।
ફણિફણાર્પિતં(ન્) તે પદામ્બુજં(ઙ્)
કૃણુ કુચેષુ નઃ(ખ્) કૃન્ધિ હૃચ્છયમ્ ॥૭॥

પ્રણત + દેહિનાં(મ્)
તૃણ + ચરાનુગં(મ્)
ફણિ + ફણાર્પિતં(ન્)

મધુરયા ગિરા વલ્ગુવાક્યયા
બુધમનોજ્ઞયા પુષ્કરેક્ષણ ।
વિધિકરીરિમા વીર મુહ્યતી -
રધરસીધુનાઽઽપ્યાયયસ્વ નઃ ॥૮॥

વલ્ગુ + વાક્યયા
બુધ + મનોજ્ઞયા
વિધિ + કરી + રિમા
રધર + સીધુનાઽઽ + પ્યાયયસ્વ

श्रीमद् ભાગવત નો આ સાર
ભગવદ્ ભક્તિ જ આધાર

તવ કથામૃતં(ન્) તપ્તજીવનં(ઙ્)
કવિભિરીડિતં(ઙ્) કલ્મષાપહમ્ ।
શ્રવણમઙ્ગલં(મ્) શ્રીમદાતતં(મ્)
ભુવિ ગૃણન્તિ તે ભૂરિદા જનાઃ ॥૯॥

તપ્ત + જીવનં(ઙ્)
કવિ + ભિરીડિતં(ઙ્)

પ્રહસિતં(મ્) પ્રિય પ્રેમવીક્ષણં(મ્)
વિહરણં(ઞ્) ચ તે ધ્યાનમઙ્ગલમ્ ।
રહસિ સં(વ્)વિદો યા હૃદિસ્પૃશઃ(ખ્)
કુહક નો મનઃ(હ્) ક્ષોભયન્તિ હિ ॥૧૦॥

પ્રેમ + વીક્ષણં(મ્)

ચલસિ યદ્ વ્રજાચ્ચારયન્ પશૂન્
નલિનસુન્દરં(ન્) નાથ તે પદમ્ ।
શિલતૃણાં(ઙ્)કુરૈઃ(સ્) સીદતીતિ નઃ(ખ્)
કલિલતાં(મ્) મનઃ(ખ્) કાન્ત ગચ્છતિ ॥૧૧॥

વ્રજાચ્ + ચારયન્
શિલ + તૃણાં(ઙ્) + કુરૈઃ(સ્)

દિનપરિક્ષયે નીલકુન્તલૈર્ -
વનરુહાનનં(મ્) બિભ્રદાવૃતમ્ ।
ઘનરજસ્વલં(ન્) દર્શયન્ મુહુર -
મનસિ નઃ(સ્) સ્મરં(મ્) વીર યચ્છસિ ॥૧૨॥

દિન + પરિક્ષયે
ઘન + રજસ્ + વલં(ન્)

પ્રણતકામદં(મ્) પદ્મજાર્ચિતં(ન્)
ધરણિમણ્ડનં(ન્) ધ્યેયમાપદિ ।
ચરણપં(ઙ્)કજં(મ્) શન્તમં(ઞ્) ચ તે
રમણ નઃ(સ્) સ્તનેષ્વર્પયાધિહન્ ॥૧૩॥

પદમ + જાર્ચિતં(ન્)
સ્તનેષ્ + વર્પ + યાધિહન્

શ્રીમદ્ ભાગવત નો આ સાર
ભગવદ્ ભક્તિ જ આધાર

સુરતવર્ધનં(મ્) શોકનાશનં(મ્)
સ્વરિતવેણુના સુષ્ઠુ ચુમ્બિતમ્ ।
ઈતરરાગવિસ્મારણં(ન્) નૃણાં(મ્)
વિતર વીર નસ્તેऽધરામૃતમ્ ॥૧૪॥

સુરત + વર્ધન(મ્)
સ્વરિત + વેણુના
ઈતર + રાગવિસ્ +મારણં(ન્)
નસ્ + તેऽધરા + મૃતમ્

અટતિ યદ્ ભવાનહ્નિ કાનનં(ન્)
ત્રુટિર્યુગાયતે ત્વામપશ્યતામ્ ।
કુટિલકુન્તલં(મ્) શ્રીમુખં(ચ) ચ તે
જડ ઉદીક્ષતાં(મ્) પક્ષ્મકૃદ્ દૃશામ્ ॥૧૫॥

ત્રુટિર + યુગાયતે
ત્વામ + પશ્યતામ્

પતિસુતાન્વયભ્રાતૃબાન્ધવા -
નતિવિલઙ્ઘ્ય તેऽન્ત્યચ્યુતાગતાઃ ।
ગતિવિદસ્તવોદ્ગીતમોહિતાઃ(ખ્)
કિતવ યોષિતઃ(ખ્) કસ્ત્યજેન્નિશિ ॥૧૬॥

પતિસુતાન્વય + ભ્રાતૃબાન્ધવા
તેऽન્ + ત્યચ્ + યુતાગતાઃ
ગતિ + વિદસ્તવોદ્ + ગીતમોહિતાઃ(ખ્)
કસ્ત્ય + જેન્ + નિશિ

રહસિ સં(વ્)વિદં(મ્) હૃચ્છયોદયં(મ્)
પ્રહસિતાનનં(મ્) પ્રેમવીક્ષણમ્ ।
બૃહદુરઃ(શ્) શ્રિયો વીક્ષ્ય ધામ તે
મુહુરતિસ્પૃહા મુહ્યતે મનઃ ॥૧૭॥

હૃચ્છ + યોદયં(મ્)
મુહુરતિ + સ્પૃહા

શ્રીમદ્ ભાગવત નો આ સાર
ભગવદ્ ભક્તિ જ આધાર

વ્રજવનૌકસાં(મ્) વ્યક્તિરઙ્ગ તે
વૃજિનહન્ત્ર્યલં(મ્) વિશ્વમઙ્ગલમ્ ।
ત્યજ મનાક્ ચ નસ્ત્વત્સ્પૃહાત્મનાં(મ્)
સ્વજનહૃદ્રુજાં(મ્) યન્નિષૂદનમ્ ॥૧૮॥

વ્રજ + વનૌ + કસાં(મ્)
વૃજિ + નહન્ + ત્ર્યલં(મ્)
નસ્ + ત્વત્ + સ્પૃહાત્ + મનાં(મ્)
યન્ + નિષૂદનમ્

યત્તે સુજાતચરણામ્બુરુહં(મ્) સ્તનેષુ
ભીતાઃ(શ્) શનૈઃ(ફ્) પ્રિય દધીમહિ કર્કશેષુ ।
તેનાટવીમટસિ તદ્ વ્યથતે ન કિં(વ્)સ્વિત્
કૂર્પાદિભિર્ભ્રમતિ ધીર્ભવદાયુષાં(ન્) નઃ ॥૧૯॥

સુજાત + ચરણામ્ + બુરુહં(મ્)
તેના + ટવી + મટસિ
કૂર્પાદિ + ભિર્ + ભ્રમતિ
ધીર્ + ભવદા + યુષાં(મ્)

ઈતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(વ્)સ્યાં(મ્) સં(વ્)હિતાયાં(ન્)
દશમસ્કન્ધે પૂર્વાર્ધે રાસક્રીડાયાં(ઙ્) ગોપીગીતં(ન્) નામૈકત્રિં(વ્)શોડધ્યાયઃ ॥



ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ ॥૧૭॥